दर्शनं नर्मदायास्तु गङ्गास्नानं तथैव च । तुलसीवनसंसर्गं सममेतत्त्रयं स्मृतम् । रोपणात् पालनात् सेकाद्दर्शनात् स्पर्शनान्नृणाम् । तुलसी दहते पापं वाङ्मनःकायसञ्चितम् । तुलसीमञ्जरीभिर्यः कुर्य्याद्धरिहरार्च्चनम् । न स गर्भगृहं याति मुक्तिभागी भवेन्नरः । पुष्करादयानि तीर्थानि गङ्गाद्याः सरितस्तथा । वासुदेवादयो देवा वसन्ति तुलसीदले । तुलसीमञ्जरीयुक्तो यस्तु प्राणान् विमुञ्चति । यमोन वीक्षितुं शक्तो युक्तं पापशतैरपि" पाद्मोत्तरख० । "यत्रैकस्तुलसीवृक्षस्तिष्ठति द्विजसत्तम ! । तत्रैव त्रिदशाः सर्व्वे ब्रह्मविष्णुशिवादयः । केशवः पत्रमध्येषु पत्राग्रेषु प्रजापतिः । पत्रवृन्ते शिवस्तिष्ठेत् तुलस्याः सर्व्वदैव हि । लक्ष्मीः सरस्वती चैव गायत्री चण्डिका तथा । शची चान्या देवपत्न्यस्तत्पुष्पेषु वसन्ति वै । इन्द्रोऽग्निः शमनश्चैव नैरृतो वरुणस्तथा । पवनश्च कुवेरश्च तच्छाखायां वसन्त्यमी । आदित्यादिग्रहाः सर्व्वे विश्वे देवाश्च सर्व्वदा । वसवो मनवश्चैव तथा देवर्षयोऽखिलाः । विद्याधराश्च गन्धर्व्वाः सिद्धाश्चाप्सरसस्तथा । तुलसीपत्रमाश्रित्य सर्व्वदा निवसन्ति वै । चिन्वन्ति तृणजातानि तुलसीमूलजानि वै । तद्देहस्था ब्रह्महत्याश्चिनोति तत्क्षणाद्धरिः । ग्रीष्मकाले द्विजश्रेष्ठ ! सुगन्धैः शीतलैर्जलैः । तुलसीसेचनं कृत्वा नरो निर्व्वाणमाप्नुयात् । चन्द्रातपं वा छत्रं वा तुलस्यै यस्तु यच्छति । विशेषतः निदाघेषु स मुक्तः सर्व्वपातकैः । वैशाखेऽक्षतधाराभिरद्भिर्यस्तुलसीं जनः । सेचयेत् सोऽश्वमेधस्य फलं प्राप्नोति नित्यशः । कदाचित्तुलसीं दुग्धैः सेचयेद् यो नरोत्तमः । तस्य वेश्मनि विप्रर्षे ! लक्ष्मीर्भवति निश्चला । गोमयैस्तुलसीमूले यः कुर्य्यादनुलेपनम् । सम्मार्ज्जनञ्च कुरुते तस्य पुण्यफलं शृणु । रजांसि तस्य यावन्ति दूरीभूतानि जैमिने ! । तावत्कल्पसहस्राणि मोदते ब्रह्मणा सह । यद्धर्मकर्म्म कुरुते मनुजः पृथिव्यां नारायणप्रियतमां तुलसीं विना च । तत्सर्व्वमेव विफलं भवति द्विजेन्द्र ! पद्मेक्षणोऽपि न हि तुष्यति देवदेवः । यस्य स्यात्तुलसीपत्रं मुखे शिरसि कर्णयोः । मृत्युकाले द्विजश्रेष्ठ ! तत्र स्वामी न भास्करिः" पाद्मे क्रियायोगसारः । "स स्नातः सर्व्वतीर्थेषु सर्व्वयज्ञेषु दीक्षितः तुलसीपत्रतोये च योऽभिषेकं समाचरेत् । गवामयुतदानेन यत्फलं लभते नरः । तुलसीपत्रदानेन तत्फलं कार्त्तिके सति ! । तुलसीतोयकणिकां मृत्युकाले च यो लभेत् । रत्नयानं समारुह्य वैकुण्ठं स प्रयाति च । त्रिकालं तुलसीपत्रं शुष्कं पर्य्युषितं सति ! । श्राद्धे व्रते वा दाने वा प्रतिष्ठायां सुरार्च्चने । भूगतं तोयपतितं यद्दत्तं विष्णवे सति ! । शुद्धन्तु तुलसीपत्रं क्षालनादन्यकर्म्मणि" पार्व्वतीं प्रति शिववाक्यम् ।

तुलसीचयननिषेधकालो यथा । "पूर्णिमायाममायाञ्च द्वादश्यां रविसंक्रमे । तैलाभ्यङ्गे च स्नाते न मध्याह्ने निशि सन्ध्ययोः । अशौचेऽशुचिकाले च रात्रिवासान्वितेऽपि वा । तुलसीं ये च चिन्वन्ति ते छिन्दन्ति हरेः शिरः" । हरिभ० । तुलसीस्पर्शनेन मिथ्याप्रतिज्ञायां मिथ्याशपथे च दोषो यथा । "तुलसीं स्वकरे कृत्वा स्वीकारं यो न रक्षति । स याति कालसूत्रञ्च यावच्चन्द्रदिवाकरौ । करोति मिथ्याशपथं तुलस्या यो हि मानवः । स याति कुम्भीपाकञ्च यावदिन्द्राश्चतुर्दश" ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ।

तुलसीपत्रचयने मन्त्रो यथा । "मातस्तुलसि ! गोविन्दहृदयानन्दकारिणि ! । नारायणस्य पूजार्थं चिनोमि त्वां नमोऽस्तु ते । कुसुमैः पारिजाताद्यैः सुगन्धैरपि केशवः । त्वया विना नैव तृप्तिं चिनोमि त्वामतः शुभे ! । त्वया विना महाभागे ! समस्तं कर्म निष्फलम् । अतस्तुलसि ! देवि ! त्वां चिनोमि वरदा भव । चयनोद्भवदुःखं यद्देवि ! ते हृदि वर्त्तते । तत् क्षमस्व जगन्मातस्तुलसि ! त्वां नमाम्यहम् । कृताञ्जलिरिमान् मन्त्रान् पठित्वा वैष्णवो जनः । करतालत्रयं दत्त्वा चिनुयात्तुलसीदलम् । शनैः शनैस्तथाकारैश्चीयते तुलसीदलम् । यथा न कम्पते शाखा तुलस्या द्विजसत्तम ! । पत्राणां चयने विप्र ! भग्नशाखा यथा भवेत् । तथा हृदि व्यथा विष्णोर्दीयते तुलसीपतेः" । पाद्मे क्रियायोगसारः ।

तुलसीकाष्ठमालामाहात्म्यं यथा । "तुलसीकाष्ठनिर्माणमालां गृह्णाति यो नरः । पदेपदेऽश्वमेधानां लभते निश्चितं फलम्" ब्रह्मवैवर्त्ते प्रकृ० । "सात्वतैस्तुलसीकाष्ठमाला कुञ्जसमुद्भवा । धार्य्या नित्यं प्रयत्नेन त्वेतद्भक्तस्य लक्षणम्" । हरिभक्तस्य तुलसीकुञ्जकाष्ठसमुद्भवा । चिह्नार्थमात्मनो माला पुरा कृष्णेन दर्शिता" पाद्मोत्तरखण्डम् "काष्ठमालाधरं विप्रं यतिनं यानरोहिणम् । खट्टास्थां विधवां दृष्ट्वा सचेलं जलमाविशेत्" इति वचनस्य साकरत्वे तुलसीकाष्ठेतरकाष्ठविषयत्वमिति वैष्णवाः । स्मार्त्तास्तु विप्रेतरपरत्वं पाद्मोत्तरखण्डवाक्यस्य वर्णयन्ति । तन्मूलञ्च "तुलसीपत्रजातेन